३५

गृत्समद (आङ्गिरसः शौनहोत्रः पश्चाद्) भार्गवः शौनकः। अपांनपात्। त्रिष्टुप्।

**उपेमसृक्षि वाजयुर्वचस्यां चनो दधीत नाद्यो गिरो मे।**

**अपां नपादाशुहेमा कुवित्स सुपेशसस्करति जोषिषद्धि॥ २.०३५.०१**

वाजयुः- सद्गतिकामः। वज गतौ। वचस्याम्- मन्त्रकामाम्। मे- मम। गिरः- वाचम्। ईम्- एतमग्निं सर्वभूतहितक्रतुं प्रति। उप असृक्षि- उत्पादयामि। नाद्यः- उदकजो हि वैद्युतोग्निः। मूलशक्तिधाराजः सर्वभूतहितक्रतुः। कुवित्- प्रभूतम्। चनः- अस्मदर्थमन्नम्। दधीत- धारयतु। अपां नपात्- जीवोदकजः। आशुहेमा- क्षिप्रगतिः। सः- असावग्निः। सुपेशसः- सुरूपाणि। करति- करोति। जोषिषत्- सेवते। हि- खलु ॥१ ॥

**इमं स्वस्मै हृद आ सुतष्टं मन्त्रं वोचेम कुविदस्य वेदत्।**

**अपां नपादसुर्यस्य मह्ना विश्वान्यर्यो भुवना जजान॥ २.०३५.०२**

इमम्- एतम्। मन्त्रम्। हृदः- अन्तर्हृदयात्। आ- आभिमुख्येन। सुतष्टम्- सुसृष्टम्। अस्मै- एतस्मा अग्नये। कुवित्- बहुलम्। वोचेम- ब्रवाम। अस्य- एतं मन्त्रम्। वेदत्- स जानातु। अपां नपात्- जीवोदकजः। असुर्यस्य मह्ना- प्राणमहिम्ना। अर्यः- आर्यशीलः सन्। विश्वानि भुवना- सर्वान् लोकान्। जजान- ससर्ज ॥२ ॥

**समन्या यन्त्युप यन्त्यन्याः समानमूर्वं नद्यः पृणन्ति।**

**तमू शुचिं शुचयो दीदिवांसमपां नपातं परि तस्थुरापः॥ २.०३५.०३**

अन्याः- मूलशक्तिधाराप्रणाल्यः। तम्- अमुं सर्वभूतहितक्रतुमग्निम्। सं यन्ति- सङ्गच्छन्ति। अन्याः- तासामितरप्रणाल्यः। उप यन्ति- उपगच्छन्ति। नद्यः- आपो मूलशक्तिधाराः। समानम्-

Dr. Rangaji
WEBOLIM

समम्। ऊर्वं- विस्तृतमग्निम्। पृणन्ति- प्रीणयन्ति। शुचयः- परिशुद्धाः। शुचिम्- परिशुद्धम्। तम्। अपां नपातम्- मूलशक्तिधाराजम्। आपः- मूलशक्तिधाराः। परि तस्थुः ॥३॥

**तमस्मेरा युवतयो युवानं मर्मृज्यमानाः परि यन्त्यापः।**
**स शुक्रेभिः शिक्वभी रेवदस्मे दीदायानिध्मो घृतनिर्णिगप्सु॥ २.०३५.०४**

तम्- अमुं क्रतुम्। अस्मेराः- दर्परहिताः। युवतयः- तरुण्यः। आपः- मूलशक्तिधाराः। युवानम्- तरुणम्। मर्मृज्यमानाः- शोधयन्त्यः। परि यन्ति- परितः सरन्ति। सः- असौ क्रतुः। शुक्रेभिः- शुक्लैः। शिक्वभिः- तेजोभिः। अस्मे- अस्मै। रेवत्- दानयोग्यसम्पद्यथा भवति तथा। अप्सु- उदकेषु मूलशक्तिधारासु। अनिध्मः- इन्धनरहितः सन्। स्वत एवेति भावः। घृतनिर्णिक्- ज्योतीरूपः। दीदाय- भासते। आधिभौतिके वैद्युतोग्निरस्मिन् मन्त्रे प्रोच्यते। आध्यात्मिके तु मूलशक्तिधारावर्धितक्रतुरुच्यते ॥४॥

**अस्मै तिस्रो अव्यथ्याय नारीर्देवाय देवीर्दिधिषन्त्यन्नम्।**
**कृता इवोप हि प्रसर्स्रे अप्सु स पीयूषं धयति पूर्वसूनाम्॥ २.०३५.०५**

अस्मै- एतस्मै। अव्यथ्याय- अव्यथमानाय। तिस्रः- भूर्भुवःसुवराख्यान्नप्राणमानसोन्मुखमूलशक्तिधाराः। देवीः- द्योतनशीलाः। अन्नम्- हव्यम्। दिधिषन्ति- धारयन्ति। अप्सु- मूलशक्तिधारासु। कृता इव- रचिता इव। हि- खलु। प्रसर्स्रे- रसाः प्रसरन्ति। पूर्वसूनाम्- तत्पूर्वमेवात्मनः प्रसूतानां रसानाम्। पीयूषम्- सारम्। सः- क्रतुः। धयति- पिबति ॥५॥

**अश्वस्यात्र जनिमास्य च स्वर्द्रुहो रिषः सम्पृचः पाहि सूरीन्।**
**आमासु पूर्षु परो अप्रमृष्यं नारातयो वि नशन्नानृतानि॥ २.०३५.०६**

Dr. Rangan

WEBOLIM

अत्र- अस्मिन् क्रतावग्नावेव। अश्वस्य- तुरगोपलक्षितप्राणस्य। अस्य- एतस्य। जनिमा- जन्म। च- अपि च। स्वर्द्रुहः- स्वर्गद्रोहिण्याः। रिषः- हिंसायाः। सम्पृचः- सम्पर्कात्। सूरीन्- विदुषः। पाहि- रक्ष। आमासु- अपक्वासु। पूर्षु- अप्सु मूलशक्तिधारासु। परः- परस्ताद्वर्तमानम्। अप्रमृष्यम्- अप्रधृष्यम्। अरातयः- लोभिनः। अनृतानि- असत्यानि अधर्मा वा। न वि नशन्- न व्याप्नुवन्ति ॥६ ॥

**स्व आ दमे सुदुघा यस्य धेनुः स्वधां पीपाय सुभ्वन्नमत्ति।**
**सो अपां नपादूर्जयन्नप्स्व१न्तर्वसुदेयाय विधते वि भाति॥ २.०३५.०७**

यस्य। स्वे- स्वकीये। दमे- सदने। सुदुघा- शोभनदोग्ध्री। धेनुः- गौरदितिरखण्डप्रकृतिः। स्वधाम्- आत्मधारणाम्। पीपाय- वर्धयति। सुभु- शोभनभवनम्। अन्नम्- हव्यम्। अत्ति- भक्षयति। अप्सु अन्तः- मूलशक्तिधारासु। सः- असौ। अपां नपात्- मूलशक्तिधाराजः। ऊर्जयन्- शक्तिं कुर्वन्। वसुदेयाय- चित्तवृत्तिस्तम्भाख्यानुग्रहदानाय। वसु स्तम्भे। विधते- परिचरत उपासकाय। वि भाति- विशेषेण प्रकाशते ॥७ ॥

**यो अप्स्वा शुचिना दैव्येन ऋतावाजस्र उर्विया विभाति।**
**वया इदन्या भुवनान्यस्य प्र जायन्ते वीरुधश्च प्रजाभिः॥ २.०३५.०८**

यः। अप्सु- मूलशक्तिधारासु। शुचिना- परिशुद्धेन। दैव्येन- दिव्येन। ऋतावा- प्रकृतिनियतियुक्तः। अजस्रः- नित्यः। उर्विया- विस्तीर्णः। विभाति- प्रकाशते। वयाः- शाखा इव। अन्या- इतरे। भुवनानि- लोकाः। अस्य- अग्नेः क्रतोः। प्र जायन्ते- प्रभूताः। प्रजाभिः- विड्भिः। वीरुधः- ओषधयः। च। प्र जायन्ते- उद्भवन्ति ॥८ ॥

**अपां नपादा ह्यस्थादुपस्थं जिह्मानामूर्ध्वो विद्युतं वसानः।**
**तस्य ज्येष्ठं महिमानं वहन्तीर्हिरण्यवर्णाः परि यन्ति यह्वीः॥ २.०३५.०९**

Dr. Rangaji
WEBOLIM

अपां नपात्- उदकजो मूलशक्तिधाराजः। उपस्थम्- अपामुपस्थानम्। अस्थात्- अध्यतिष्ठत्। हि- खलु। जिह्मानाम्- कुटिलानाम्। ऊर्ध्वः- उपरि गतो विमुक्तः। विद्युतम्- तडिज्ज्योतिः। वसानो भवति। तस्य। ज्येष्ठम्- प्रथमम्। महिमानम्- माहात्म्यम्। वहन्तीः- धारयन्त्यः। हिरण्यवर्णाः- द्योतनशीलाः। यह्वीः- महत्य आपः। परि यन्ति- परितः सरन्ति ॥९॥

**हिर॑ण्यरूप॒ः स हिर॑ण्यसंदृग॒पां नपा॒त्सेदु॒ हिर॑ण्यवर्णः।**

**हि॒र॒ण्यया॒त्परि॒ योनेर्नि॒षद्या॑ हिरण्य॒दा द॑द॒त्यन्न॑मस्मै॥ २.०३५.१०**

हिरण्यरूपः- ज्योतीरूपः। सः- असौ क्रतुरग्निः। हिरण्यसंदृक्- आत्मज्योतिषो द्रष्टा। अपां नपात्- मूलशक्तिधाराजः। सः। हिरण्यवर्णः- प्रकाशवर्णः। हिरण्ययात् योनेः- ज्योतिर्मयमूले। परि निषद्य- उपविश्य। हिरण्यदाः- ज्योतिषां दाता। अस्मै- एतस्मै यजमानाय। अन्नम्। ददति- यच्छति ॥१०॥

**तद॒स्यानी॑कमु॒त चारु॒ नामा॑पी॒च्यं॑ वर्धते॒ नप्तु॑र॒पाम्।**

**यमि॒न्धते॑ युव॒तय॒ः समि॒त्था हिर॑ण्यवर्णं॑ घृ॒तमन्न॑मस्य॥ २.०३५.११**

तत्। अस्य- एतस्य। अपां नप्तुः- जीवोदकजस्य। नाम- नामोपलक्षितमन्त्रः। अपीच्यम्- अन्तर्हितः। चारु- कल्याणः। अनीकः- समूहहितः। वर्धते। युवतयः- आपः। इत्था- एवम्। यम्। हिरण्यवर्णं- दीप्तम्। समिन्धते- सम्यगुद्दीपयन्ति। अस्य- एतस्य। अन्नम्। घृतम्- दीप्तिधाराक्षरणात्मिका भावनैव ॥११॥

**अ॒स्मै ब॑हू॒नाम॑व॒माय॒ सख्ये॑ य॒ज्ञैर्वि॑धेम॒ नम॑सा ह॒विर्भिः॑।**

**सं सानु॒ मार्ज्मि॒ दिधि॑षामि॒ बिल्मै॒र्दधा॒म्यन्नैः॒ परि॑ वन्द ऋ॒ग्भिः॥ २.०३५.१२**

अस्मै- एतस्मै। बहूनाम्- प्रभूतानां देवानाम्। अवमाय- दास्यभावयुक्ताय। सख्ये। नमसा- नमस्कारेण। हविर्भिः- आह्वानसाधनैः। यज्ञैः। विधेम- परिचरेम। सानु- उच्छ्रितभावनम्। सम्-

Dr. Ranganji

WEBOLIM

सम्यक्। मार्ज्मि- शोधयामि। बिल्मैः- भासनैर्भावनैः। दिधिषामि- शब्दयामि। धिष शब्दे। अन्नैः- भोगैः। दधामि- धारयामि। ऋग्भिः- मन्त्रैः। परि वन्दे- नमस्करोमि ॥१२॥

**स ईं वृषाजनयत्तासु गर्भं स ईं शिशुर्धयति तं रिहन्ति।**
**सो अपां नपादनभिम्लातवर्णोऽन्यस्येवेह तन्वा विवेष॥ २.०३५.१३**

स ईम्- सोऽयम्। वृषा- वर्षकः। तासु- अप्सु। गर्भमजनयत्- गर्भभूतो जात इति भावः। स ईम्- सोऽयम्। शिशुः- वत्सः सन्। धयति- जीवोदकजनन्याः स्तनं पिबति। तम्- तादृशं शिशुमग्निम्। रिहन्ति- तं लिहन्ति। सः। अपां नपात्- जीवोदकजः। अभिम्लातवर्णः- अक्षीणवर्णः। इह- अत्र पृथिव्याम्। अन्यस्येव- नभसीव। तन्वा- पार्थिवेन स्वदेहेन। विवेष- व्याप्तो बभूव। विष्लृ व्याप्तौ ॥१३॥

**अस्मिन्पदे परमे तस्थिवांसमध्वस्मभिर्विश्वहा दीदिवांसम्।**
**आपो नप्त्रे घृतमन्नं वहन्तीः स्वयमत्कैः परि दीयन्ति यह्वीः॥ २.०३५.१४**

अस्मिन्- एतस्मिन्। परमे पदे- उत्कृष्टे भावने। तस्थिवांसम्- स्थितम्। अध्वस्मभिः- अध्वंसितैस्तेजोभिः। विश्वहा- सर्वेष्वहःसु। दीदिवांसम्- भासमानम्। नमामि। यह्वीः- महत्यः। आपः- मूलशक्तिधाराः। नप्त्रे- स्वतनयायाग्नये क्रतवे। घृतम्- दीप्तम्। अन्नम्- हव्यम्। वहन्तीः- भरन्त्यः। स्वयम्- स्वतः। अत्कैः- स्वगतिभिः। परि दीयन्ति- परिगच्छन्ति ॥१४॥

**अयांसमग्ने सुक्षितिं जनायायांसमु मघवद्भ्यः सुवृक्तिम्।**
**विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः॥ २.०३५.१५**

अग्ने- पावक क्रतो। जनाय- विशे। सुक्षितिम्- शोभनभूमिकाभूतम्। त्वा। अयांसम्- प्रपन्नोस्मि। मघवद्भ्यः- देवेभ्यः। अयांसम्- उपरमं प्राप्नुयाम्। यम उपरमे। देवाः- द्योतनशीलाः। यत्।

Dr. Rangaji
WEBOLIM

अवन्ति- रक्षन्ति। तत्। विश्वम्- सर्वम्। भद्रम्- मङ्गळमेव। विदथे- यज्ञे। सुवीराः- शोभनवीर्यसम्पन्नाः सन्तः। बृहत्- महत्। वदेम- ब्रवाम ॥१५॥

Dr. Ranganji

WEBOLIM